# संस्कृत वार्ता:

दिनाङ्क :- 24.05.2026 प्रात: - 06:55

**जयशंकर-रुबियो-मेलनम्**

नवदिल्ल्यां हैदराबाद-हाउस-स्थले अद्य विदेशमन्त्री डॉ. सुब्रह्मण्यम्-जयशंकरः अमेरिका-देशीयेन विदेश-सचिवेन मार्को-रुबियो-इत्यनेन समं द्विपक्षीय-संवादं करिष्यति। एतौ क्षेत्रीय-वैश्विकशान्ति-सुरक्षा-सम्बद्धान् विषयान् समेत्य अनेकेषु भिन्न-विषयेषु चर्चां करिष्यतः इति आशास्ते। अमेरिका-विदेशमन्त्री गतदिने प्रातः चतुर्दिवसात्मक-यात्रा-प्रसङ्गे भारतं सम्प्राप्तः। द्विपक्षीय-सम्बन्धान् सुदृढीकर्तुं, अपि च वाणिज्य-रक्षोर्जा-सुरक्षा-प्राविधिकी-हिन्दप्रशान्त-व्यूह-रचनेत्यादिषु क्षेत्रेषु सहयोग-विस्तारार्थं तस्य एषा भारतयात्रा नितरां महत्त्वाधायिनी वर्तते। गतवासरे सः प्रधानमन्त्रिणा नरेन्द्रमोदिना सह 'भारतामेरिका-व्यापक-वैश्विक-रणनीतिक-सन्धिं' सुद्रढयितुं चर्चाम् अकरोत्। प्रधानमन्त्रि-कार्यालयस्य विज्ञप्त्यनुसारि, अमेरिका-विदेशमन्त्रिणा रक्षा-प्राविधिकी-व्यापार-निवेशोर्जा-सुरक्षा-सम्पर्क-शिक्षा-पारस्परिक-जनसम्बन्धादिषु विविध-क्षेत्रेषु द्विपक्षीय-सहयोगस्य निरन्तर-प्रगतेः विषये प्रधानमन्त्री संसूचितः। अस्मिन् अवसरे श्रीमोदी शान्ति-प्रयासेभ्यः भारतस्य सतत-समर्थनं पुनरुदीरितवान्, अपि च 'सम्भाषण-कूटनीति'-माध्यमेन विवादानां शान्तिपूर्ण-समाधानाय पुनरेकदा आह्वानं कृतवान्।

=========================

**गोयलः/कनाडायात्रा**

वाणिज्योद्योग-मन्त्री पीयूष-गोयलः अद्यारभ्य भारतीय-व्यापार-नेतॄणाम् एकेन प्रतिनिधि-मण्डलेन सह कनाडा-देशस्य त्रिदिवसीय-यात्रायां भविष्यति। वाणिज्य-मन्त्रालयेन सूचितं यत् श्रीगोयलः व्यापार-निवेश-भारत-कनाडा-व्यापकार्थिक-सहभागितासन्धि-संवादम् अग्रे प्रवर्तयितुम् ओटावा-टोरोन्टो-नगरयोः द्विपक्षीयोपवेशनं करिष्यति।

==========================

<u>मुरुगनः</u>

संसदीयकार्य-सूचनाप्रसारण-राज्यमन्त्री एल्.मुरुगनः अवदत् यत् प्रशासनं सप्तचत्वारिंशदधिक-द्विसहस्रतम-वर्षपर्यन्तं 'विकसितं भारतम्' इति स्वप्नं साकारयितुं प्रतिबद्धम् अस्ति। चेन्नई-स्थिते आई.सी.एफ्.-संस्थाने आयोजिते आजीविका-मेलके सः उक्तवान् यत् प्रधानमन्त्रिणः नरेन्द्रमोदिनः नेतृत्वे देशः आधारभूत-संरचनायाः विकासे, वृत्यवसराणां वृद्धौ व्यापार-सुगमतायां च तीव्रगत्या प्रगतिं करोति।

==========================

<u>संस्कृत-साप्ताहिकी</u>

प्रिया: श्रोतार:, संस्कृत-जगता सम्बद्धै: विभिन्नै: क्रिया-कलापै: संवलितस्य संस्कृत-साप्ताहिकीति-विशिष्ट-कार्यक्रमस्य प्रसारणम् आकाशवाण्या: एफ्.एम्.गोल्ड्-प्रवाहिकात: अद्य मध्याह्ने सार्धैक-वादनत: भविष्यति। भवन्त: सर्वे यथाकालं श्रोतुं प्रभवन्ति।

==========================

<u>ऋतुः</u>

भारतीयर्तु-विभागेन अद्य पूर्वीयोत्तर-प्रदेशाय, पूर्वीय-मध्यप्रदेशाय विदर्भाय च अतिताप-परा रक्तवार्णिकी संचेतना प्रसारिता अस्ति। भारतस्य उत्तर-पश्चिमीय-मध्य-पूर्वीय-दिग्विभागेषु कतिपय-क्षेत्रेषु समाना एव स्थितिः आगामि-सप्त-दिवसेभ्यः भविष्यति इत्यपि विभागेन सूचितम्।

==========================

<u>क्रिकेट्</u>

इण्डियन्-प्रीमियर्-लीग्-क्रिकेट्-स्पर्धा-मालिकायां गतरात्रौ लखनऊ-नगरे इकाना-क्रिकेट्-क्रीडाङ्गणे आयोजिते द्वन्द्वे श्रेयस्-अय्यरेण अर्जितानाम् एकोत्तर-शत-धावनाङ्कानां बलेन पञ्जाब-किंग्स्-दलेन लखनऊ-सुपर-जाइंट्स-दलं सप्तभिः क्रीडकैः पराजितम्। अय्यरः क्रीडान्ते स्पर्धापुरुषः घोषितः।

अद्यतने द्वन्द्वद्वये, प्रथमं मुम्बय्यां वानखेडे-क्रीडाङ्गणे अपराह्णे सार्ध-त्रिवादने मुम्बई-इण्डियन्स्-दलं राजस्थान-रॉयल्स्-दलेन स्पर्धिष्यते। ततः सायं सार्ध-सप्त-वादने कोलकातायाम् ईडन्-गार्डन्स्-क्रीडाङ्गणे कोलकाता-नाइट्-राईडर्स्-दिल्ली-कैपिटल्स्-दलयोः द्वन्द्वं भविष्यति।

==========================

।। इति वार्ताः।।